राष्ट्रिय-संस्कृत-संस्थानम्
( मानितविश्वविद्यालयः )
भारतशासन-मानवसंसाधन-विकासमन्त्रालयाधीनम्
नवदेहली

# 49 तमा अखिलभारतीया शास्त्रीया स्पर्धा

## विभिन्नराज्येषु
## राज्यस्तरीय-शास्त्रीयस्पर्धाः च

# नियमावलिः

# पुरोवाक्

भारतशासनपक्षतः राष्ट्रियसंस्कृतसंस्थानेन संस्कृतविश्वविद्यालयेषु पारम्परिकसंस्कृतशिक्षणसंस्थासु गुरुकुलेषु वा शास्त्राणि अधीयानानां प्रतिभां प्रोत्साहयितुं, तेषां विकासाय च प्रतिवर्षम् अखिलभारतीय-शास्त्रीय-स्पर्धा आयोज्यते। आरम्भवर्षेषु अखिलभारत-संस्कृतभाषणस्पर्धा इति व्यवहृतः अयं कार्यक्रमः सम्प्रति भाषणेतर-शास्त्रीयस्पर्धानामपि संयोजनात् अखिलभारत-शास्त्रीय-स्पर्धा-नाम्ना सञ्चाल्यते। ऐषमः आयोजनस्य 49तमे वर्षे कार्यक्रमोऽयं गुजरातराज्यस्य छारोडीस्थ-'दर्शनम्' - संस्कृतमहाविद्यालये भविष्यति। मीमांसाशास्त्रे शलाकापरीक्षा, धातुरूपकण्ठपाठः, शोधच्छात्राणां कृते शास्त्रार्थविचारः चेति स्पर्धात्रयम् अस्मिन् पर्याये नूतनतया संयोजितम्। एवं च पूर्वतः सञ्चाल्यमानाः, सम्प्रति संयोजिताः च योजयित्वा 22 स्पर्धाः ऐषमः आयोजयिष्यन्ते। अखिलभारत-स्पर्धायां भागग्रहीतृणाम् अर्हाणां चयनाय राज्यस्तरीयशास्त्रीयस्पर्धाः अपि विभिन्नेषु राज्येषु आयोजयिष्यन्ते। अखिलभारतीय-स्पर्धानां राज्यस्तरीयस्पर्धानां च विवरणसहिता नियमावलिः, नामाङ्कनप्रपत्रं च एतस्यां पुस्तिकायां प्रकट्यन्ते। स्पर्धासु भागग्रहणे आसक्ताः नियमावलिं परिशील्य स्वस्वसंस्थामाध्यमेन नामाङ्कनं कारयेयुः। स्पार्धार्थिभ्यो भूयः शुभकामनाः वितरामि।

**–राधावल्लभः त्रिपाठी**

# विषयसूची


| | | |
|---|---|---|
| 1. | अखिलभारतीय-शास्त्रीयस्पर्धानियमावलिः | 3-7 |
| 2. | अखिलभारतीयस्पर्धासु भागग्रहणाय प्रक्रिया | 7 |
| 3. | शलाकापरीक्षाविधानम् | 8 |
| 4. | राज्यस्तरीय-शास्त्रीयस्पर्धानियमावलिः | 9-13 |
| 5. | राज्यस्तरीच-स्पर्धासु भागग्रहणाय नामाङ्कनार्थं प्रक्रिया | 13 |
| 6. | राज्यस्तरीय-शास्त्रीयस्पर्धायोजनस्थानानि | 14-15 |
| 7. | अवधेयांशाः | 16 |
| 8. | प्रमुखाः तिथयः | 16 |
| 9. | राज्यस्तरीयस्पर्धायै नामाङ्कनाय प्रपत्रम्-1 | 17-19 |
| | प्रपत्रम्-2 | 20 |
| | प्रपत्रम्-3 | 21 |

# राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

# नवचत्वारिंशी अखिलभारतीया शास्त्रीया स्पर्धा

## नवम्बर् 2011, 'दर्शनम्' संस्कृतमहाविद्यालयः, छारोडी, गुजरात

# नियमावलिः

## I. भाषणस्पर्धा

| क्र.सं | स्पर्धायाः नाम | भागग्रहणाय अर्हाः/अर्हता | पुरस्कारः |
|---|---|---|---|
| 1. | व्याकरणभाषणम् | • संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु आचार्यकक्षायाम् अथवा तत्समकक्षायाम् कस्मिंश्चिदपि शास्त्रे अधीयानाः छात्राः।<br>• यस्मिन् राज्ये तत्तद्विषयेषु आचार्यस्तरे पारम्परिक-संस्कृतपाठशालासु अध्ययन-व्यवस्था नास्ति तस्माद् राज्यात् तत्तद्विषयक-शास्त्रि/तत्समकक्षायाम् अन्तिमवर्षे अधीयानाः छात्राः अथवा शास्त्रान्तरे आचार्यस्तरे अधीयानाः भागं ग्रहीतुमर्हन्ति।<br>• आचार्यस्तरे शास्त्रविशेषे अध्यापनव्यवस्था अस्ति, किन्तु अस्मिन् वर्षे अमुकशास्त्रे छात्राः न सन्ति इति स्थितौ तस्मिन् शास्त्रे भाषणस्पर्धायां शास्त्रिकक्षायाः अन्तिम-वर्षच्छात्राः अथवा आचार्यस्तरे शास्त्रान्तरम् अधीयानाः समर्थाः भागं ग्रहीतुम् अर्हन्ति।<br>• प्रतिराज्यं/प्रति-स्पर्धालुगणं प्रत्येकं विषये (शास्त्रे) भाषणस्पर्धायाम् एकः एव स्पर्धालुः भागं ग्रहीतुमर्हति।<br>• एकः स्पर्धालुः भाषणेषु एकस्मिन् विषये एव भागं ग्रहीतुमर्हति अर्थात् एकः स्पर्धालुः शास्त्रद्वये भाषणस्पर्धायां भागग्रहणाय नानुमन्यते।<br>• भाषणाय विषयाः चतुर्विंशतेः (24) होराभ्यः पूर्वं स्पर्धास्थले घोषिताः भविष्यन्ति।<br>• भाषणाय षट्-निमेषात्मकः कालः दीयते। [(5+1) पञ्चनिमेषाणामन्ते सूचना दीयते। तदनन्तरम् एकनिमेषाभ्यन्तरे भाषणम् उपसंहरणीयम्।]<br>• भाषणानन्तरं निर्णायकाः प्रश्नान् पृच्छेयुः। | I. स्वर्णपदकम् + 7000/- रूप्यकाणि च।<br>II. रजतपदकम् + 5000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 3000/- रूप्यकाणि च। |
| 2. | साहित्यभाषणम् | | |
| 3. | न्यायभाषणम् | | |
| 4. | साङ्ख्य-योगभाषणम् | | |
| 5. | मीमांसाभाषणम् | | |
| 6. | वेदान्तभाषणम् | | |
| 7. | धर्मशास्त्रभाषणम् | | |
| 8. | ज्यौतिषभाषणम् | | |

अनुवर्तते....

## II. शलाकापरीक्षा

| क्र.सं स्पर्धायाः नाम | भागग्रहणाय अर्हाः/अर्हता | पुरस्कारः |
|---|---|---|
| **9. साहित्यशास्त्रशलाकापरीक्षा** ध्वन्यालोकः 1-4 उद्द्योताः | • संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु शास्त्रिकक्षायां/आचार्यकक्षायां/तत्समकक्षायां/गुरुकुले वा अधीयानाः छात्राः। (गुरुकुले अधीयानानां वयोमितिः - 01-01-2011तमे दिनाङ्के 28 वर्षाणि अतीतानि न स्युः)<br>• प्रत्येकं शास्त्रे शलाकापरीक्षायाम् एकस्मात् राज्यात् (प्रतिस्पर्धालुगणम्) एकस्यैव अवसरः।<br>• एकस्य छात्रस्य एकस्मिन् शास्त्रे एव स्पर्धायाम् अवसरः कल्प्यते।<br>• भाषणस्पर्धायां कण्ठपाठस्पर्धायां वा यः भागं गृह्णाति सः अत्र भागग्रहणं नार्हति।<br>• **शलाकापरीक्षाविधानविषये विवरणं अस्याः पुस्तिकायाः पृ.सं-8 इत्यत्र अवलोकनीयम्।** | **उत्तीर्णेषु प्रथम/द्वितीय/तृतीय-स्थानभाजां कृते पुरस्कारः-**<br>I. स्वर्णपदकम् + स्वर्णशलाका + 7000/- रूप्यकाणि च।<br>II. रजतपदकम् + 5000/- रूप्यकाणि च।<br>III. कांस्यपदकम्+ 3000/- रूप्यकाणि च।<br>सर्वेभ्यः उत्तीर्णेभ्यः प्रमाणपत्राणि।<br>**उत्तीर्णतामानदण्डः/ श्रेणीनिर्धारणम् इत्थम्-**<br>• 80% अङ्काः, तदुपरि च विशिष्टश्रेणी+रु. 2000/-<br>• 65% अङ्काः, तदुपरि च प्रथमश्रेणी+रु. 1500/-<br>• 60% तदुपरि च 64% पर्यन्तम् उत्तीर्णताप्रमाणपत्रमात्रम्। |
| **10. व्याकरणशलाकापरीक्षा** महाभाष्ये द्वितीयम् आह्निकम् | | |
| **11. न्यायशलाकापरीक्षा** न्यायसिद्धान्तमुक्तावल्याम् शब्दखण्डः | | |
| **12. सिद्धान्तज्यौतिषशलाका-परीक्षा** सिद्धान्तशिरोमणेः आदितः त्रिप्रश्नाधिकारपर्यन्तम् | | |
| **13. वेदान्तशलाकापरीक्षा** विवेकचूडामणिः | | |
| **14. पुराणेतिहासशलाकापरीक्षा** श्रीमद्भागवते 10-11 स्कन्धौ | | |
| **15. मीमांसाशलाकापरीक्षा** मीमांसापरिभाषा (सम्पूर्णा) | | |

## III. कण्ठपाठस्पर्धा

| | | |
|---|---|---|
| **16. काव्यकण्ठपाठः** कुमारसम्भवे 1-5 सर्गाः | • संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु प्राक्शास्त्री/मध्यमा-तत्सम-कक्षायाम्/गुरुकुले अधीयानाः छात्राः। (गुरुकुले अधीयानानां वयोमितिः - 01-01-2011 तमे दिनाङ्के 18 वर्षाणि अतीतानि न स्युः)<br>• प्रतिराज्यं/प्रति-स्पर्धालुगणम् एकस्य एव अवसरः।<br>• भाषणस्पर्धायां/शलाकापरीक्षायाम्/ अन्य-कण्ठपाठस्पर्धासु वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति।<br>• निर्णायकाः निर्दिष्टग्रन्थभागे प्रत्येकं सर्गस्य विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः। निर्णायकैः उद्धृतात् स्थानात्, यावत् पर्यन्तं निर्णायकाः श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना श्लोकाः श्रावणीयाः। | I. स्वर्णपदकम् + 7000/- रूप्यकाणि च।<br>II. रजतपदकम् + 5000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 3000/- रूप्यकाणि च। |

अनुवर्तते....

| क्र.सं स्पर्धायाः नाम | भागग्रहणाय अर्हाः/अर्हता | पुरस्कारः |
|---|---|---|
| **17. अमरकोषकण्ठपाठः**<br>(सम्पूर्णः अमरकोषः) | • संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु प्राक्शास्त्री/मध्यमा-तत्सम-कक्षायाम् गुरुकुले वा अधीयानाः छात्राः (गुरुकुले अधीयानानां वयोमितिः 01-01-2011 तमे दिनाङ्के 18 वर्षाणि अतीतानि न स्युः)<br>• प्रतिराज्यं/प्रति-स्पर्धालुगणम् एकस्य अवसरः।<br>• भाषणस्पर्धायां/शलाकापरीक्षायाम्/ अन्य-कण्ठपाठस्पर्धासु वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति।<br>• अस्यां स्पर्धायां सकृत् (कस्मिंश्चित् वर्षे) स्वर्णपदकेन पुरस्कृतः अनन्तरवर्षेषु पुनः अस्यां स्पर्धायां भागग्रहणाय न अनुमन्यते।<br>• निर्णायकाः अमरकोषस्य प्रत्येकं काण्डस्य विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः। निर्णायकैः उद्धृतात् स्थानात्, यावत् पर्यन्तं निर्णायकाः श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना श्लोकाः श्रावणीयाः। | I. स्वर्णपदकम् + 7000/- रूप्यकाणि च।<br>II. रजतपदकम् + 5000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 3000/- रूप्यकाणि च। |
| **18. अष्टाध्यायीकण्ठपाठः**<br>(सम्पूर्णा अष्टाध्यायी) | • संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु प्राक्शास्त्रिकक्षायां/शास्त्रि-कक्षायां/आचार्यकक्षायां/तत्समकक्षायां वा अधीयानाः छात्राः। (गुरुकुले अधीयानानां वयोमितिः 01-01-2011तमे दिनाङ्के 28 वर्षाणि अतीतानि न स्युः)<br>• प्रतिराज्यं प्रति-स्पर्धालुगणम् एकस्यैव अवसरः।<br>• भाषणस्पर्धायां/शलाकापरीक्षायाम्/ अन्य-कण्ठपाठस्पर्धासु वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति।<br>• अस्यां स्पर्धायां सकृत् (कस्मिंश्चित् वर्षे) स्वर्णपदकेन पुरस्कृतः अनन्तरवर्षेषु पुनः अस्यां स्पर्धायां भागग्रहणाय न अनुमन्यते।<br>• निर्णायकाः अष्टाध्याय्याः प्रत्येकम् अध्याये विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः। निर्णायकैः उद्धृतात् सूत्रात्, यावत् पर्यन्तं निर्णायकाः श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना सूत्राणि श्रावणीयानि। | I. स्वर्णपदकम् + 7000/- रूप्यकाणि च।<br>II. रजतपदकम् + 5000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 3000/- रूप्यकाणि च। |

अनुवर्तते....

| क्र.सं स्पर्धायाः नाम | भागग्रहणाय अर्हाः/अर्हता | पुरस्कारः |
|---|---|---|
| **19. धातुरूपकण्ठपाठः**<br>कपिलदेवद्विवेदिप्रणीतप्रौढरचनानुवादकौमुद्यां प्रदर्शितानि 100 धातूनां दशसु लकारेषु सर्वाणि रूपाणि।<br><br>(धातूनां सूची एतस्याः पुस्तिकायाः उपान्तिमे आवरणपृष्ठे अपि प्रदत्ता वर्तते) | • पारम्परिकसंस्कृतशिक्षणसंस्थासु पू.मध्यमा/उ.मध्यमा/मध्यमा/प्राक्शास्त्री/शास्त्री/आचार्य-तत्समकक्षायाम् गुरुकुले वा अधीयानाः छात्राः। (गुरुकुले अधीयानानां वयोमितिः 01-01-2011 तमे दिनाङ्के 28 वर्षाणि अतीतानि न स्युः)<br>• प्रतिराज्यं/प्रतिस्पर्धालुगणम् एकस्य अवसरः।<br>• भाषणस्पर्धायां/शलाकापरीक्षायाम्/ अन्य-कण्ठपाठस्पर्धासु वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति।<br>• निर्णायकैः पृष्टधातूनां रूपाणि (विभिन्न-लकारेषु) स्पर्धालुना वक्तव्यानि। | I. स्वर्णपदकम् + 7000/- रूप्यकाणि च।<br>II. रजतपदकम् + 5000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 3000/- रूप्यकाणि च। |
| **20. शास्त्रार्थविचारः** | • संस्कृतविश्वविद्यालयेषु/संस्कृतमहाविद्यालयेषु/पारम्परिकशिक्षणसंस्थासु/आदर्शशोधसंस्थासु कस्मिंश्चिदपि शास्त्रे अनुसन्धानकार्यरताः नियमिताः शोधच्छात्राः भागग्रहणाय अर्हाः।<br>• प्रत्येकं राज्यात् राज्यस्तरे चितौ द्वौ एव शोधच्छात्रौ अस्यां स्पर्धायां भागं ग्रहीतुमर्हतः।<br>• कश्चित् शास्त्रीयो विषयः (प्रायः सर्वशास्त्रसाधारणः) विस्तरेण प्रतिपादयितुं प्रदास्यते। विषयश्च मासात् पूर्वमेव रा.सं. संस्थानस्य विश्वव्यापिजालपुटमाध्यमेन (www. sanskrit.nic.in) अन्यप्रकारेण वा उद्घोषयिष्यते।<br>• स्पर्धालुः प्रदत्तविषयाधारेण स्वाभीष्टशास्त्रानुसारं 12 निमेषात्मके काले विषयं प्रतिपादयेत्। तदनन्तरं निर्णायकाः स्पर्धिना सह उक्तविषये/सम्बद्धविषये गहनशास्त्रचर्चां कुर्युः। निर्णायकैः पृष्टप्रश्नानां समाधानं स्पर्धालुना देयम्। | I. स्वर्णपदकम् + 7000/- रूप्यकाणि च।<br>II. रजतपदकम् + 5000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 3000/- रूप्यकाणि च। |
| **IV. समस्यापूर्तिः अन्त्याक्षरी च** | | |
| **21. समस्यापूर्तिः** | • समस्यापूर्तौ अन्त्याक्षर्यां च प्रत्येकं राज्यात् आगतस्पर्धालुगणस्य सर्वे सदस्याः भागं ग्रहीतुमर्हन्ति। अर्थात् भाषणस्पर्धायां/अष्टाध्यायीकण्ठपाठे/काव्यकण्ठपाठे/अमरकोषकण्ठपाठे धातुरूपकण्ठपाठे/शास्त्रार्थविचारे वा ये भागं गृह्णन्ति ते अपि समस्यापूर्तौ अन्त्याक्षर्यां च भागं ग्रहीतुमर्हन्ति। | I. स्वर्णपदकम् + 7000/- रूप्यकाणि च।<br>II. रजतपदकम् + 5000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 3000/- रूप्यकाणि च। |

अनुवर्तते....

| क्र.सं स्पर्धायाः नाम | भागग्रहणाय अर्हाः/अर्हता | पुरस्कारः |
|---|---|---|
| 22. अन्त्याक्षरी | • समस्यापूर्तिनिमित्तं समस्यात्रयम् स्पर्धास्थाने उद्घोष्यते। अर्धघण्टाकाले प्रत्येकं स्पर्धार्थिना समस्याद्वयं पूरणीयम् (दत्तपङ्क्तिमुपयुज्य श्लोकरचना कर्तव्या)<br>• अन्त्याक्षर्याम् अधोनिर्दिष्टग्रन्थेभ्यः एव श्लोकाः स्वीकरणीयाः– 1. स्वप्नवासवदत्तम् 2. रघुवंशम्, 3. कुमारसम्भवम्, 4. बुद्धचरितम् (अश्वघोषस्य) 5. सौन्दरानन्दम् (अश्वघोषस्य) 6. किरातार्जुनीयम्, 7. अभिज्ञानशाकुन्तलम्, 8. विक्रमोर्वशीयम्, 9. मालविकाग्निमित्रम्, 10. मेघदूतम्, 11. नैषधीयम्, 12. उत्तररामचरितम्, 13. शिशुपालवधम्, 14. मृच्छकटिकम्, 15. मुद्राराक्षसम्। एतेभ्यः ग्रन्थेभ्यः सर्वे श्लोकाः स्वीकर्तुं शक्यन्ते।<br>• पूर्ववर्तिना स्पर्धालुना पठितस्य श्लोकस्य **तृतीयपादगतं प्रथमाक्षरं** गृहीत्वा स्वस्वपर्याये स्पर्धालुः श्लोकं पठेत्। यथा– 'कश्चित् कान्ता .......' इति मेधदूतश्लोके पठिते सति क्रमागतपर्यायः स्पर्धी **य**कारेणारभ्यमाणं श्लोकं पठेत्। | I. स्वर्णपदकम् + 7000/- रूप्यकाणि च।<br>II. रजतपदकम् + 5000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 3000/- रूप्यकाणि च। |

**विजयवैजयन्ती**

विभिन्नस्पर्धासु स्पर्धालूनां पुरस्कारोपलब्धेः आधारेण अत्यधिकाङ्कभाजे स्पर्धालुगणाय विजयवैजयन्ती प्रदास्यते।

- उपर्युक्तासु स्पर्धासु प्रत्येकं स्पर्धायां निर्णयकाले प्रथम-द्वितीय-तृतीयस्थानेषु प्रत्येकं स्थाने यदि द्वयोः स्पर्धाल्वोः बहूनां वा समाङ्काः आयान्ति तर्हि तयोः स्पर्धाल्वोः/तेषां स्पर्धालूनां समाङ्कभञ्जनाय पुनः स्पर्धा (आशुस्पर्धा) आयोज्येत।
- आहत्य प्रतिराज्यं/प्रति-स्पर्धालुगणं त्रयोविंशतिः स्पर्धालवः (भाषणे-8, शलाकायां-7, काव्यकण्ठपाठ-अष्टाध्यायी-अमरकोषकण्ठपाठ-धातुरूपकण्ठपाठ-समस्यापूर्ति-अन्त्याक्षरी-स्पर्धासु एकैकः शास्त्रार्थविचारे द्वौ चेत्याहत्य 23) अखिलभारतीयायां शास्त्रीयस्पर्धायां भागं ग्रहीतुमर्हन्ति।

## अखिलभारतीय (राष्ट्रस्तरीय)-स्पर्धासु भागग्रहणाय प्रक्रिया

➢ **राज्यस्तरीयस्पर्धासु चिताः, उपरितनसूच्यां दर्शितरीत्या अर्हतावन्तः** अखिलभारतीयायां (राष्ट्रस्तरीयायां) स्पर्धायां भागं ग्रहीष्यन्ति। अर्थात् राज्यस्तरीयस्पर्धायोजनसमित्या राष्ट्रस्तरीयस्पर्धानिमित्तं चितः अर्हस्पर्धिगणः एव राष्ट्रस्तरीय (अखिलभारतस्तरीय)-स्पर्धायाम् उपस्थितः भवेत्। तद्विहाय काचिदपि संस्था साक्षादेव स्वीयं छात्रम् अखिलभारतीय-स्पर्धां प्रति प्रेषयितुम् न अर्हति। अतः उपरि निर्दिष्टासु स्पर्धासु **भागग्रहणचिकीर्षवः/स्पर्धार्थिनः आदौ राज्यस्तरीयस्पर्धार्थं स्वस्वसंस्थामाध्यमेन निर्दिष्टप्रपत्रं प्रपूर्य राज्यस्तरीयस्पर्धायोजकसंस्थायै सम्प्रेष्य नामाङ्कनं कुर्युः।**

➢ राज्यस्तरीय-शास्त्रीयस्पर्धायाः नियमावलिः, राज्यस्तरीयस्पर्धा कस्य राज्यस्य कुत्र भविष्यति? तदायोजकाः के? राज्यस्तरीयस्पर्धायै नामाङ्कनाय प्रपत्रम् इत्यादि विवरणम् अग्रिमेषु पृष्ठेषु (पृ.सं. 8 तः 23 ) अवलोकनीयम्।

◆◆◆

## राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

# शलाकापरीक्षा-विधानम्

**स्पर्धालोः ( अध्येतुः ) कर्तव्यम्–**

शलाकास्पर्धायां भागग्रहणचिकीर्षुणा स्पर्धालुना निर्दिष्टशास्त्रस्य निर्दिष्ट-ग्रन्थभागस्य समग्रतया (न तु अंशतः) अध्ययनं कार्यम्। स्पर्धालुः (अध्येता) ग्रन्थस्य निर्दिष्टभागस्य सर्वाः पङ्क्तीः कण्ठस्थीकुर्यात्, ग्रन्थपङ्क्तीनां विशदं व्याख्यानं कर्तुं सामर्थ्यं सम्पादयेत्, निर्दिष्टे ग्रन्थभागे विद्यमानविषयेषु गहनशास्त्रचर्चां कर्तुमपि कौशलं सम्पादयेत्। एतदभ्यन्तरे, एतस्याः पुस्तिकायाः पृष्ठसंख्या – 13 इत्यत्र सूचितरीया राज्यस्तरीयस्पर्धार्थं नामाङ्कनमपि समये कारणीयम्।

**परीक्षाविधानम्–**

अखिलभारतीयायां, राज्यस्तरीयायां च शलाकापरीक्षायां निर्दिष्टग्रन्थम् अधीतवतः प्रत्येकं स्पर्धालोः परीक्षणं त्रिधा क्रियते–

I. स्मृतिबल/धारणाशक्ति-परीक्षणम्

II. ग्रन्थपङ्क्तेः व्याख्यानसामर्थ्यपरीक्षणम्

III. विशिष्टज्ञानपरीक्षणम्/शास्त्रचर्चा/गाढपरीक्षणम्

**I. प्रथमः घट्टः** ( स्मृतिबल/धारणाशक्ति-परीक्षणम्)

- परीक्षकैः शलाकया उद्धृतात् स्थानात् एका ग्रन्थपङ्क्तिः उच्चार्यते। ततः आरभ्य छात्रेण अग्रिमपङ्क्तयः श्रावणीयाः (परीक्षकाः यावत् श्रोतुमिच्छन्ति तावत्पर्यन्तम्)
- परीक्षकेषु एकैकः अपि एकस्य छात्रस्य एतादृशपरीक्षणम् अन्यूनं त्रिवारं कुर्यात्। [स्पर्धार्थिसंख्याम्, समयं च अनुसृत्य परीक्षकाः ततोऽधिकप्रश्नान् अपि कर्तुमर्हन्ति।]
- प्रतिवारमपि परीक्षकैः शलाकया एव प्रश्नस्थानानि उद्घाटनीयानि।

**II. द्वितीयः घट्टः** ( व्याख्यानसामर्थ्यपरीक्षणम्)

- परीक्षकैः शलाकया उद्घाटितस्थानात् ग्रन्थपङ्क्तिरेका उच्चार्यते। तस्याः पङ्क्तेः विशदं व्याख्यानं छात्रः कुर्यात्। छात्रस्य एतादृशं परीक्षणं एकैकः अपि परीक्षकः अन्यूनं त्रिवारं कुर्यात्। परीक्षकैः प्रतिवारं शलाकया प्रश्नस्थानानि चेतव्यानि।

**III. तृतीयः घट्टः** ( विशेषावगतिपरीक्षणम्/गाढज्ञानपरीक्षणम्)

- परीक्षकाः शलाकया उद्धृते स्थाने विद्यमाने विषये गहनप्रश्नान् कुर्युः। छात्रेण सह शास्त्रचर्चां कुर्युः। छात्रेण प्रदत्तसमाधानमनुसृत्य उपप्रश्नान् अपि परीक्षकाः कर्तुमर्हन्ति येन छात्रस्य ग्रन्थावगतेः स्तरः निर्णीतः भवेत्। एकवारं कृत-प्रश्नोपप्रश्न-शास्त्रचर्चादीनां समाधानात् परं पुनः शलाकया ग्रन्थमुद्घाट्य द्वितीयवारम् एवमेव प्रश्नोपप्रश्नचर्चादिकं भवेत्। अनया रीत्या तृतीयवारं, चतुर्थवारं/पञ्चमवारं च परीक्षकाः प्रश्नान् कुर्युः।

त्रिष्वपि घट्टेषु स्पर्धालुना स्वीयं समार्थ्यं प्रदर्शनीयम्। अन्यथा भागग्रहणम् अपूर्णं भवेत्। परीक्षायाम् उत्तीर्णेषु एव पुरस्काराय प्रथम/द्वितीय/तृतीय-स्थाननिश्चयः क्रियते।

# राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

# राज्यस्तरीया शास्त्रीया स्पर्धा

### अक्टोबर २०११

# नियमावलिः

I. **भाषणस्पर्धा**

<table>
<tr><th>क्र.सं</th><th>स्पर्धायाः नाम</th><th>भागग्रहणाय अर्हाः/अर्हता</th><th></th></tr>
<tr><td>1.</td><td>व्याकरणभाषणम्</td><td rowspan="9">• संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु आचार्यकक्षायाम् अथवा तत्समकक्षायाम् कस्मिंश्चिदपि शास्त्रे अधीयानाः छात्राः।<br>• यस्मिन् संस्कृतमहाविद्यालये/पारम्परिक-संस्कृतपाठशालासु तत्तद्विषयेषु आचार्यस्तरे अध्ययनव्यवस्था नास्ति तस्याः संस्थायाः तत्तद्विषयकशास्त्रि/ तत्समकक्षायाम् अन्तिम-वर्षे अधीयानाः छात्राः अथवा शास्त्रान्तरे आचार्यस्तरे अधीयानाः भागं ग्रहीतुमर्हन्ति।<br>• आचार्यस्तरे शास्त्रविशेषे अध्यापनव्यवस्था अस्ति, किन्तु अस्मिन् वर्षे अमुकशास्त्रे छात्राः न सन्ति इति स्थितौ तस्मिन् शास्त्रे भाषणस्पर्धायां शास्त्रिकक्षायाः अन्तिम-वर्षच्छात्राः अथवा आचार्यस्तरे शास्त्रान्तरम् अधीयानाः समर्थाः भागं ग्रहीतुम् अर्हन्ति।<br>• प्रतिमहाविद्यालयं/प्रतिसंस्थं/प्रति-स्पर्धालु-गणं प्रत्येकं विषये (शास्त्रे) भाषण-स्पर्धायाम् एकः एव स्पर्धालुः भागं ग्रहीतुमर्हति।<br>• भाषणाय विषयाः चतुर्विंशतेः (24) होराभ्यः पूर्वं स्पर्धास्थले घोषिताः भविष्यन्ति।<br>• भाषणाय षट्-निमेषात्मकः कालः दीयते। [(5+1) पञ्चनिमेषाणामन्ते सूचना दीयते। तदनन्तरम् एकनिमेषाभ्यन्तरे भाषणम् उपसंहरणीयम्।]<br>• भाषणानन्तरं निर्णायकाः प्रश्नान् पृच्छेयुः।</td><td rowspan="9"></td></tr>
<tr><td>2.</td><td>साहित्यभाषणम्</td></tr>
<tr><td>3.</td><td>न्यायभाषणम्</td></tr>
<tr><td>4.</td><td>साङ्ख्य-योगभाषणम्</td></tr>
<tr><td>5.</td><td>मीमांसाभाषणम्</td></tr>
<tr><td>6.</td><td>वेदान्तभाषणम्</td></tr>
<tr><td>7.</td><td>धर्मशास्त्रभाषणम्</td></tr>
<tr><td>8.</td><td>ज्यौतिषभाषणम्</td></tr>
<tr><td></td><td></td></tr>
</table>

अनुवर्तते....

## II. शलाकापरीक्षा

<table>
<tr><th>क्र.सं स्पर्धायाः नाम</th><th>भागग्रहणाय अर्हाः/अर्हता</th><th></th></tr>
<tr><td>9. साहित्यशास्त्रशलाकापरीक्षा<br>ध्वन्यालोकः 1-4 उद्द्योताः</td><td rowspan="7">• संस्कृतविश्वविद्यालयेषु/पारम्परिक-संस्कृतशिक्षणसंस्थासु शास्त्रिकक्षायां/आचार्यकक्षायां/तत्समकक्षायां/गुरुकुले वा अधीयानाः छात्राः। (गुरुकुले अधीयानानां वयोमितिः - 01-01-2011तमे दिनाङ्के 28 वर्षाणि अतीतानि न स्युः)<br>• प्रत्येकं शास्त्रे एकस्याः संस्थायाः/गुरुकुलस्य (प्रतिस्पर्धालुगणम्) एकस्यैव अवसरः।<br>• एकस्य छात्रस्य एकस्मिन् शास्त्रे एव शलाकास्पर्धायाम् अवसरः कल्प्यते।<br>• शलाकापरीक्षाविधानविषये विवरणं एतस्याः पुस्तिकायाः पृ.सं. 8 इत्यत्र अवलोकनीयम्।</td><td rowspan="7"></td></tr>
<tr><td>10. व्याकरणशलाकापरीक्षा<br>महाभाष्ये द्वितीयम् आह्निकम्</td></tr>
<tr><td>11. न्यायशलाकापरीक्षा<br>न्यायसिद्धान्तमुक्तावल्याम् शब्दखण्डः</td></tr>
<tr><td>12. सिद्धान्तज्यौतिषशलाका-परीक्षा सिद्धान्तशिरोमणेः आदितः त्रिप्रश्नाधिकारपर्यन्तम्</td></tr>
<tr><td>13. वेदान्तशलाकापरीक्षा<br>विवेकचूडामणिः</td></tr>
<tr><td>14. पुराणेतिहासशलाकापरीक्षा<br>श्रीमद्भागवते 10-11 स्कन्धौ</td></tr>
<tr><td>15. मीमांसाशलाकापरीक्षा<br>मीमांसापरिभाषा (सम्पूर्णा)</td></tr>
</table>

## III. कण्ठपाठस्पर्धा

<table>
<tr><td>16. काव्यकण्ठपाठः<br>कुमारसम्भवे 1-5 सर्गाः</td><td>• संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु प्राक्शास्त्री/मध्यमा-तत्सम-कक्षायाम्/गुरुकुले अधीयानाः छात्राः। (गुरुकुले अधीयानानां वयोमितिः-01-01-2011-तमे दिनाङ्के 18 वर्षाणि अतीतानि न स्युः)<br>• प्रत्येकं संस्थायाः/प्रति-स्पर्धालुगणम् एकस्य एव अवसरः।<br>• निर्णायकाः निर्दिष्टग्रन्थभागे प्रत्येकं सर्गस्य विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः। निर्णायकैः उद्धृतात् स्थानात्, यावत् पर्यन्तं निर्णायकाः श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना श्लोकाः श्रावणीयाः।</td><td></td></tr>
</table>

अनुवर्तते....

| क्र.सं स्पर्धायाः नाम | भागग्रहणाय अर्हाः/अर्हता | |
|---|---|---|
| **17. अमरकोषकण्ठपाठः**<br>(सम्पूर्णः अमरकोषः) | • संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु प्राक्शास्त्री/मध्यमा-तत्सम-कक्षायाम् गुरुकुले वा अधीयानाः छात्राः (गुरुकुले अधीयानानां वयोमितिः 01-01-2011 तमे दिनाङ्के 18 वर्षाणि अतीतानि न स्युः)<br>• प्रतिमहाविद्यालयं/प्रतिसंस्थं/प्रति-स्पर्धालु-गणम् एकस्य अवसरः।<br>• अस्यां स्पर्धायां सकृत् (कस्मिंश्चित् वर्षे) स्वर्णपदकेन पुरस्कृतः अनन्तरवर्षेषु पुनः अस्यां स्पर्धायां भागग्रहणाय न अनुमन्यते।<br>• निर्णायकाः अमरकोषस्य प्रत्येकं काण्डस्य विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः। निर्णायकैः उद्धृतात् स्थानात्, यावत् पर्यन्तं निर्णायकाः श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना श्लोकाः श्रावणीयाः। | |
| **18. अष्टाध्यायीकण्ठपाठः**<br>(सम्पूर्णा अष्टाध्यायी) | • संस्कृतविश्वविद्यालयेषु/पारम्परिकसंस्कृत-शिक्षणसंस्थासु प्राक्शास्त्रिकक्षायां/शास्त्रि-कक्षायां/आचार्यकक्षायां/तत्समकक्षायां वा अधीयानाः छात्राः। (गुरुकुले अधीयानानां वयोमितिः 01-01-2011तमे दिनाङ्के 28 वर्षाणि अतीतानि न स्युः)<br>• प्रतिमहाविद्यालयं/प्रतिसंस्थं/ प्रति-स्पर्धालु-गणम् एकस्यैव अवसरः।<br>• अस्यां स्पर्धायां सकृत् (कस्मिंश्चित् वर्षे) स्वर्णपदकेन पुरस्कृतः अनन्तरवर्षेषु पुनः अस्यां स्पर्धायां भागग्रहणाय न अनुमन्यते।<br>• निर्णायकाः अष्टाध्याय्याः प्रत्येकम् अध्याये विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः। निर्णायकैः उद्धृतात् स्थानात्, यावत् पर्यन्तं निर्णायकाः श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना सूत्राणि श्रावणीयानि। | |

अनुवर्तते....

| क्र.सं स्पर्धायाः नाम | भागग्रहणाय अर्हाः/अर्हता | |
|---|---|---|
| **19. धातुरूपकण्ठपाठः**<br>कपिलदेवद्विवेदिप्रणीतप्रौढरचनानुवादकौमुद्यां प्रदर्शितानि 100 धातूनां दशसु लकारेषु सर्वाणि रूपाणि।<br><br>(धातूनां सूची एतस्याः पुस्तिकायाः उपान्तिमे आवरणपृष्ठे अपि प्रदत्ता वर्तते) | • पारम्परिकसंस्कृतशिक्षणसंस्थासु पू.मध्यमा/उ.मध्यमा/मध्यमा/प्राक्शास्त्री/शास्त्री/आचार्य-तत्समकक्षायाम् गुरुकुले वा अधीयानाः छात्राः। (गुरुकुले अधीयानानां वयोमितिः 01-01-2011 तमे दिनाङ्के 28 वर्षाणि अतीतानि न स्युः)<br>• प्रतिमहाविद्यालयं/प्रतिसंस्थं/प्रतिस्पर्धालुगणम् एकस्य अवसरः।<br>• निर्णायकैः पृष्टधातूनां रूपाणि (विभिन्नलकारेषु) स्पर्धालुना वक्तव्यानि। | |
| **20. शास्त्रार्थविचारः** | • संस्कृतविश्वविद्यालयेषु/संस्कृतमहाविद्यालयेषु/पारम्परिकशिक्षणसंस्थासु/आदर्शशोधसंस्थासु कस्मिंश्चिदपि शास्त्रे अनुसन्धानकार्यरताः नियमिताः शोधच्छात्राः भागग्रहणाय अर्हाः।<br>• प्रत्येकं संस्थायाः चितौ द्वौ एव शोधच्छात्रौ अस्यां स्पर्धायां भागं ग्रहीतुमर्हतः।<br>• कश्चित् शास्त्रीयो विषयः (प्रायः सर्वशास्त्रसाधारणः) विस्तरेण प्रतिपादयितुं प्रदास्यते। विषयश्च मासात् पूर्वमेव रा.सं.संस्थानस्य विश्वव्यापिजालपुटमाध्यमेन (www.sanskrit.nic.in) अन्यप्रकारेण वा उद्घोषयिष्यते।<br>• स्पर्धालुः प्रदत्तविषयाधारेण स्वाभीष्टशास्त्रानुसारं 12 निमेषात्मके काले विषयं प्रतिपादयेत्। तदनन्तरं निर्णायकाः स्पर्धिना सह उक्तविषये/सम्बद्धविषये गहनशास्त्रचर्चां कुर्युः। निर्णायकैः पृष्टप्रश्नानां समाधानं स्पर्धालुना देयम्। | |
| **IV. समस्यापूर्तिः अन्त्याक्षरी च** | | |
| **21. समस्यापूर्तिः** | • समस्यापूर्तौ अन्त्याक्षर्यां च प्रत्येकं राज्यात् आगतस्पर्धालुगणस्य सर्वे सदस्याः भागं ग्रहीतुमर्हन्ति। अर्थात् भाषणस्पर्धायां/अष्टाध्यायीकण्ठपाठे/काव्यकण्ठपाठे/अमरकोषकण्ठपाठे धातुरूपकण्ठपाठे/ शास्त्रार्थविचारे वा ये भागं गृह्णन्ति ते अपि समस्यापूर्तौ अन्त्याक्षर्यां च भागं ग्रहीतुमर्हन्ति। | |

अनुवर्तते....

| क्र.सं स्पर्धायाः नाम | भागग्रहणाय अर्हाः/अर्हता | |
|---|---|---|
| **22. अन्त्याक्षरी** | • समस्यापूर्तिनिमित्तं समस्यात्रयम् स्पर्धास्थाने उद्घोष्यते। अर्धघण्टाकाले प्रत्येकं स्पर्धार्थिना समस्याद्वयं पूरणीयम् (दत्तपङ्क्तिमुपयुज्य श्लोकरचना कर्तव्या)<br>• अन्त्याक्षर्याम् अधोनिर्दिष्टग्रन्थेभ्यः एव श्लोकाः स्वीकरणीयाः– 1. स्वप्नवासवदत्तम् 2. रघुवंशम्, 3. कुमारसम्भवम्, 4. बुद्धरितम् (अश्वधोषस्य) 5. सौन्धरनन्दम् 6. किरातार्जुनीयम्, 7. अभिज्ञानशाकुन्तलम्, 8. विक्रमोर्वशीयम्, 9. मालविकाग्निमित्रम्, 10. मेघदूतम्, 11. नैषधीयम्, 12. उत्तररामचरितम्, 13. शिशुपालवधम्, 14. मृच्छकटिकम्, 15. मुद्राराक्षएम्। एतेभ्यः ग्रन्थेभ्यः सर्वे श्लोकाः स्वीकर्तुं शक्यन्ते।<br>• पूर्वपठितस्य श्लोकस्य तृतीयपादगतं प्रथमाक्षरं गृहीत्वा स्वस्वपर्याये स्पर्धालुः श्लोकं पठेत्। यथा कश्चित् कान्तेति पेधदूत श्लोके पठिते इति क्रमागतपर्यायः स्पर्धी यकारेणार-यमानं श्लोकं पठेत्। | |

* उपर्युक्तासु स्पर्धासु प्रत्येकं स्पर्धायां निर्णयकाले प्रथम-द्वितीय-तृतीयस्थानेषु प्रत्येकं स्थाने यदि द्वयोः स्पर्धाल्वोः बहूनां वा समाङ्काः आयान्ति तर्हि तयोः स्पर्धाल्वोः/तेषां स्पर्धालूनां समाङ्कभञ्जनाय पुनः स्पर्धा (आशुस्पर्धा) आयोज्येत।

* **आहत्य** प्रत्येकं संस्थायाः/प्रति-स्पर्धालुगणं **त्रयोविंशतिः स्पर्धालवः** (भाषणे-8, शलाकायां-7, काव्यकण्ठपाठ-अष्टाध्यायी कण्ठपाठ-अमरकोषकण्ठपाठधातुरूपकण्ठपाठ-समस्यापूर्ति-अन्त्याक्षरी-स्पर्धासु एकैकः, शास्त्रार्थविचारे द्वौ चेत्याहत्य 23) राज्यस्तरीयायां शास्त्रीयस्पर्धायां भागं ग्रहीतुमर्हन्ति।

* राज्यस्तरीयस्पर्धासु चिताः, **अखिलभारतीय(राष्ट्रस्तरीय)-शास्त्रीयस्पर्थायाः नियमावल्यां (पृ.सं. 3 तः 8) दर्शितरीत्या अर्हतावन्तः एव** अखिलभारतीयायां (राष्ट्रस्तरीयायां) स्पर्धायां भागं ग्रहीष्यन्ति।

## राज्यस्तरीय-स्पर्धासु भागग्रहणाय नामाङ्कनार्थं प्रक्रिया

➢ उपरि निर्दिष्टासु राज्यस्तरीय-स्पर्धासु भागग्रहणचिकीर्षवः/स्पर्धार्थिनः तदर्थं स्वस्वसंस्थामाध्यमेन निर्दिष्टप्रपत्रं प्रपूर्य राज्यस्तरीयस्पर्धायोजकसंस्थायै सम्प्रेष्य नामाङ्कनं कुर्युः।

➢ राज्यस्तरीयस्पर्धा कस्य राज्यस्य कुत्र भविष्यति? तदायोजकाः के? राज्यस्तरीयस्पर्धायै नामाङ्कनाय निर्दिष्टं प्रपत्रम् इत्यादि विवरणम् अग्रिमेषु पृष्ठेषु (पृ.सं. 14 तः 23) अवलोकनीयम्।

◆◆◆

## राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

# राज्यस्तरीय-शास्त्रीयस्पर्धायोजनस्थानानि/आयोजकसंस्थाः

| क्र.सं | राज्यम् | राज्यस्तरीयस्पर्धायोजनस्थानम्/आयोजकसंस्था |
|---|---|---|
| 1. | जम्मू-काश्मीरम् | राष्ट्रियसंस्कृतसंस्थानम्, रणवीरपरिसरः, जम्मू<br>कोट-भलवाल, जम्मू-181122<br>☎ : 0532-2460957 |
| 2. | हिमाचलप्रदेशः | राष्ट्रियसंस्कृतसंस्थानम्, गरलीपरिसरः,<br>ग्राम/पत्रालय-गरली, काँगड़ा-177108<br>☎ : 01970-245409 |
| 3. | देहली | श्री दीवान-कृष्ण-किशोर-एस्. डी.<br>आदर्श-संस्कृतमहाविद्यालयः, अम्बाला कैण्ट्-133001, हरियाणा<br>☎: 0171-2634283 |
| 4. | हरियाणा | |
| 5. | पञ्जाबः | |
| 6. | उत्तराखण्डः | भगवानदास आ. संस्कृतमहाविद्यालयः,<br>गुरुकुल-काङ्गडी, हरिद्वारम् उत्तराखण्डः, ☎ |
| 7. | उत्कलम् | राष्ट्रियसंस्कृतसंस्थानम्, सदाशिवपरिसरः<br>पुरी-752001,<br>☎ : 06752-223439 |
| 8. | बिहारम् | श्री सीताराम-वैदिक-आदर्श-संस्कृतमहाविद्यालयः, 7/2 पी.डब्ल्यू.डी. रोड, कोलकाता-700035 पश्चिम बंगाल, ☎ 033-25777250 |
| 9. | झारखण्डः | |
| 10. | पश्चिमवङ्गः | |
| 11. | पूर्वोत्तरम् | त्रिपुराविश्वविद्यालयः, त्रिपुरा<br>(समभावितं स्थानम्) |

अनुवर्तते....

| क्र.सं | राज्यम् | राज्यस्तरीयस्पर्धायोजनस्थानम्/आयोजकसंस्था |
|---|---|---|
| 12. | राजस्थानम् | राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसरः,<br>त्रिवेणी-नगरम्, गोपालपुर-बाईपास, जयपुरम्-302018,<br>☎ : 0141-2760686 |
| 13. | उत्तरप्रदेशः | राष्ट्रियसंस्कृतसंस्थानम्, लखनऊपरिसरः,<br>विशाल-खण्डः 4, गोमती-नगरम्, लखनऊ-226010<br>☎ : 0522-2393748 |
| 14. | मध्यप्रदेशः | राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः,<br>ई-7/62, अरेरा कॉलोनी, भोपाल-462016<br>☎ : 0755-2421877 |
| 15. | छत्रीसगढम् | |
| 16. | गुजरात् | 'दर्शनम्' संस्कृतमहाविद्यलायः,<br>श्री स्वामिनारायण-गुरुकुल-विश्वविद्याप्रतिष्ठानम्,<br>एस्.जी.वी.पी. वृत्तम्, एस्.जि राजमार्गः, छारोडी, अहमदाबाद्-382481<br>☎ 02717-242141 तः 3 फेक्स्-242083 |
| 17. | महाराष्ट्रम् | राष्ट्रियसंस्कृतसंस्थानम्, क.जे. सोमैया-संस्कृतविद्यापीठपरिसरः,<br>एस्.आई.एम्.एस्.आर्. भवनम्, विद्याविहारः, मुम्बई-400077<br>☎ : 022-25025452 |
| 18. | गोवा | |
| 19. | आन्ध्रप्रदेशः | मद्रपुरीसंस्कृतमहाविद्यालयः (मद्रास-संस्कृत-कालेज एवं<br>एस्.एस्.वी पाठशाला) 84, रोय् पेट, हाई-रोड्, मैलापुरम्,<br>चेन्नै - 600004, ☎ 044-24980429, 24338497 |
| 20. | तमिलनाडु | |
| 21. | पाण्डिचेरी | |
| 22. | केरलम् | राष्ट्रियसंस्कृतसंस्थानम्, गुरुवायूरपरिसरः,<br>पो०पुरनाटुक्करा, त्रिचूर-680551<br>☎ 0487-2307608 |
| 23. | कर्णाटकम् | कर्णाटकशासनम्<br>कर्णाटकाराज्ये कर्णाटकराज्यशासनेन राज्यस्तरीयस्पर्धा प्रतिवर्षम्<br>आयोज्यते। तदायोजन-दिनाङ्कस्थानादिविवरणं राज्यशासनतः<br>प्राप्तव्यमस्ति। |

सूचना- या आयोजकसंस्था द्वयोः राज्ययोः त्रयाणां राज्यानां वा स्पर्धिनां कृते राज्यस्तरीयस्पर्धाम् आयोजयति सा प्रत्येकं राज्यस्य पृथक्-पृथक् अर्हस्पर्धिगणं राष्ट्रस्तरीयस्पर्धायै निश्चिनुयात् (न तु साकल्येन)।

## अवधेयांशा:

- पारम्परिकसंस्कृतशिक्षणसंस्था: (संस्कृतविश्वविद्यालया:/संस्कृतमहाविद्यालया:) गुरुकुलानि/संस्कृत-शोधसंस्थानानि च स्वस्वसंस्थापक्षत: राज्यस्तरीय-शास्त्रीयस्पर्धायै अर्हस्पर्धिगणं निश्चित्य प्रपूरित- नामाङ्कनप्रपत्रं 30-8-2011 दिनाङ्कं यावत् तत्तद्राज्यस्तरीयस्पर्धायोजकसंस्थां प्रति प्रेषयेयु:।
- शलाकापरीक्षादिषु सर्वासु शास्त्रीयस्पर्धासु भागग्रहणाय सतत-गभीरपरिश्रमस्य आवश्यकता भवति। अत: छात्राणां कृते अपेक्षितं मार्गदर्शनं विधाय स्पर्धानां गुणवत्तास्तरवर्धनाय छात्रान् सम्प्रेरयेयु:/प्रोत्साहयेयु: इति तत्तत्संस्थाया: आचार्येषु निवेदनम्।
- राज्यस्तरीयशास्त्रीयस्पर्धा: 2011-अक्टोबर्-तृतीय-चतुर्थसप्ताहयो: यदा कदापि भवितुमर्हन्ति। राज्यस्तरीयस्पर्धायोजनदिनाङ्कविषये इदमित्थमिति सूचना सम्बद्धसंस्थाभ्य: (याभि: संस्थाभि: राज्यस्तरीयस्पर्धायै स्वीयच्छात्राणां नामाङ्कनं कारितं ताभ्य: संस्थाभ्य:) पत्रद्वारा 15 सेप्तम्बर् - 2011 दिनाङ्कं यावत् प्रेषयिष्यते।
- राज्यस्तरीयस्पर्धासु चितानां राष्ट्रस्तरीय (अखिलभारतस्तरीय)-स्पर्धायै अर्हाणां सूचीं राज्यस्तरीयस्पर्धा-योजकसंस्था: राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालयं प्रति 30 अक्टोबर् 2011 दिनाङ्कं यावत् प्रेषयेयु:।

---

### प्रमुखा: तिथय:-

| | |
|---|---|
| ☛ संस्थानस्य विश्वव्यापिजालपुटे शलाकापरीक्षा-कण्ठपाठादीनां विषयधोषणा | – 2011 ............सप्ताह: |
| ☛ राज्यस्तरीयस्पर्धार्थं नामाङ्कनाय काल: | – 10 जूलै 2011 त: 30 अगस्त् 2011 पर्यन्तम् |
| ☛ राज्यस्तरीय-शास्त्रार्थविचाराय विषयघोषणा | – 1 सेप्तम्बर् 2011 |
| ☛ राज्यस्तरीयस्पर्धाया: आयोजनम् विविधराज्येषु | – 15 त: 25 अक्टोबर् 2011 |
| ☛ अखिलभारतीयशास्त्रीयस्पर्धाया: आयोजनम् | – 2011 नवम्बरमासस्य अन्ते |

---

### सम्पर्कसूत्रम्

राज्यस्तरीयस्पर्धायोजनविषये जिज्ञासितं ज्ञातुं तत्तद्राज्यस्तरीयस्पर्धायोजकसंस्थानां/संस्थानपरिसराणां प्राचार्याणां सम्पर्क: कर्तुं शक्यते। (तेषां दूरवाणीसंख्यासहितसङ्केतसूची एतस्या: पुस्तिकाया: 16-17 पृष्ठयो: विद्यते।) तदतिरिच्य, अखिलभारतीयशास्त्रीयस्पर्धासम्बन्धिविवरणं प्राप्तुं सङ्केत: -

1. आचार्य रामनुजदेवनाथ:
कुलसचिव:
राष्ट्रिय-संस्कृत-संस्थानम्
56-57 इन्स्टीट्यूशनल्-एरिया
जनकपुरी, नवदेहली - 110058
☎ 011-28521994, 28520979 फेक्स्- 28520976, 28524387

2. कू.वेङ्कटेशमूर्ति: (सहायकाचार्य:, मु.स्वा.पी.)
☎ 011-28524993, 09868256044

# राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली
# राज्यस्तरीय-शास्त्रीयस्पर्धाः (अक्टोबर् - 2011)
## राज्यस्तरीय-शास्त्रीयस्पर्धायां भागं ग्रहीतुमर्हाणां नामाङ्कनाय प्रपत्रम्

**[राज्यस्तरीय-शास्त्रीयस्पर्धायाः नियमावलिं परिशील्य स्वसंस्थायाः पक्षतः एतत् प्रपत्रं प्रपूर्य प्रेषणीयम्।]**

**सूचना** - एतस्मिन् पञ्जीकरणपत्रे स्पष्टतया **देवनागर्या एव** नामानि लेखनीयानि। एतदनुसृत्यैव प्रमाणपत्रेषु नामानि लिखितानि भवेयुः।

**संस्थायाः नाम** - ..............................................................................................................

**संस्थायाः स्वरूपम्** - संस्कृतविश्वविद्यालयः/महाविद्यालयः/गुरुकुलम्/आ.शोधसंस्था (यदुचितं तत् चिह्नीकुर्वन्तु)

**सङ्केतः** - ..............................................................................................................

**राज्यम्** - ..............................................................................................................

| क्र.सं | स्पर्धायाः नाम | स्पर्धार्थिनः नाम देवनागर्या<br>यत्र भागग्रहणाय चितः | कक्षा | अधीयमानं शास्त्रम् |
|---|---|---|---|---|
| 1. | व्याकरणभाषणम् | | | |
| 2. | साहित्यभाषणम् | | | |
| 3. | न्यायभाषणम् | | | |
| 4. | साङ्ख्य-योगभाषणम् | | | |
| 5. | मीमांसाभाषणम् | | | |
| 6. | वेदान्तभाषणम् | | | |
| 7. | धर्मशास्त्रभाषणम् | | | |
| 8. | ज्यौतिषभाषणम् | | | |
| 9. | साहित्यशलाकापरीक्षा | | | |

अनुवर्तते....

| क्र.सं | स्पर्धायाः नाम | स्पर्धार्थिनः नाम देवनागर्या<br>यत्र भागग्रहणाय चितः | कक्षा | अधीयमानं<br>शास्त्रम् |
|---|---|---|---|---|
| 10. | व्याकरणशलाकापरीक्षा | | | |
| 11. | न्यायशलाकापरीक्षा | | | |
| 12. | सिद्धान्तज्योतिष-<br>शलाकापरीक्षा | | | |
| 13. | वेदान्तशलाकापरीक्षा | | | |
| 14. | पुराणेतिहास-<br>शलाकापरीक्षा | | | |
| 15. | मीमांसाशलाकापरीक्षा | | | |
| 16. | काव्यकण्ठपाठः | | | |
| 17. | अमरकोषकण्ठपाठः | | | |
| 18. | अष्टाध्यायीकण्ठपाठः | | | |
| 19. | धातुरूपकण्ठपाठः | | | |
| 20. | शास्त्रार्थविचारः | 1.<br>2. | | |
| 21. | समस्यापूर्तिः* | | | |
| 22. | अन्त्याक्षरी* | | | |

* भवत्संस्थातः समस्यापूर्तेः अन्त्याक्षर्याः च निमित्तमेव पृथक्-पृथक् चितयोः नाम 21, 22 क्रमाङ्कयोः पुरतः कोष्ठके उल्लेखनीयम्। तौ अतिरिच्य भवत्संस्थायाः स्पर्धिगणस्य अन्येऽपि सदस्याः अनयोः स्पर्धयोः (समस्यापूर्तौ अन्त्याक्षर्यां च) स्वस्य इच्छामनुसृत्य भागं ग्रहीतुमर्हन्ति। तादृशानां नामानि निर्दिष्टपृथक्पत्रे (संलग्नयोः प्रपत्रसंख्या-2, प्रपत्रसंख्या-3 इत्यनयोः) प्रपूर्य एतेन पत्रेण सहैव प्रेषयेयुः।

**अस्मत्संस्थातः आगन्तॄणां संख्या-**

| बालकाः | बालिकाः | मार्गदर्शकः | मार्गदर्शिका | आहत्य सङ्ख्या |
|---|---|---|---|---|
| | | | | |

**प्रमाणीकरोमि यत् उपरि निर्दिष्टाः छात्राः अस्मत्संस्थायाम् अधीयानाः उपरि दर्शितरीत्या तत्तत्स्पर्धासु भागग्रहणाय आजिगमिषन्ति।**

**प्राचार्यस्य हस्ताक्षरम्**

नाम-

सङ्केतः-

मार्गदर्शकस्य/मार्गदर्शिकायाः नाम

दूरवाणी-

दूरवाणी-

सूचना :- एतत् प्रपत्रं प्रपूर्य राज्यस्तरीय-शास्त्रीयस्पर्धायोजकसंस्थायै 30-8-2011 दिनाङ्कं यावत् प्रेषणीयम्

प्रपत्रसङ्ख्या-2

# राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

## राज्यस्तरीय-शास्त्रीयस्पर्धाः ( अक्टोबर् - 2011 )

## समस्यापूर्तिस्पर्धायै नामाङ्कनपत्रम्

**संस्थायाः नाम** ..........................................................................................

**राज्यम्** ..........................................................................................

| क्र.सं | स्पर्धार्थिनः नाम | |
|---|---|---|
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |

प्राचार्यस्य/मार्गदर्शकस्य/मार्गदर्शिकायाः हस्ताक्षरम्

प्रपत्रसङ्ख्या-3

# राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

## राज्यस्तरीय-शास्त्रीयस्पर्धाः ( अक्टोबर् - 2011 )

## अन्त्याक्षरीस्पर्धायै नामाङ्कनपत्रम्

**संस्थायाः नाम** ................................................................................

**राज्यम्** ................................................................................

| क्र.सं | स्पर्धार्थिनः नाम | |
|---|---|---|
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |

प्राचार्यस्य/मार्गदर्शकस्य/मार्गदर्शिकायाः हस्ताक्षरम्

## धातुरूपकण्ठपाठनिमित्तं निर्दिष्टाः धातवः

- **भ्वादिगणे–** 1.**भू**, 2. **हस्**, 3. **पठ्**, 4. **रक्ष्**, 5. **वद्**, 6. **गम्**, 7. **दृश्**, 8. **पा**, 9. **स्था**, 10. **घ्रा**, 11. **सद्**, 12. **पच्**, 13. **नम्**, 14. **स्मृ**, 15. **जि**, 16. **श्रु**, 17. **कृष्**, 18. **वस्**, 19. **त्यज्**, 20. **सेव्**, 21. **लभ्**. 22. **वृध्**, 23. **मुद्**, 24. **सह्**, 25. **वृत्**, 26. **ईक्ष्**, 27. **नी**, 28. **हृ**, 29. **याच्**, 30. **वह्**।
- **अदादिगणे–** 31. **अद्**, 32. **अस्**, 33. **इ**., 34. **रुद्**, 35. **स्वप्**, 36. **दुह्**, 37. **लिह्**, 38. **हन्**, 39. **स्तु**, 40 **या**, 41. **पा**, 42. **शास्**, 43. **विद्**, 44. **आस्**, 45. **शी**, 46. **अधि+इ**, 47. **ब्रू**।
- **जुहोत्यादिगणे–** 48. **हु**, 49. **भी**, 50. **हा**, 51. **ह्री**, 52. **भृ**, 53. **मा**, 54. **दा**, 55. **धा**।
- **दिवादिगणे–** 56, **दिव्**, 57, **नृत्**, 58. **नश्**, 59. **भ्रम्**, 60. **श्रम्**, 61. **सिव्**, 62. **सो**, 63. **शो**, 64. **कुप्**, 65. **पद्**, 66. **युध्**, 67. **जन्**।
- **स्वादिगणे–** 68. **आप्**, 69. **शक्**, 70. **चि**, 71. **अश्**, 72. **सु**।
- **तुदादिगणे–** 73. **इष्**, 74. **प्रच्छ्**, 75. **लिख्**, 76. **स्पृश्**, 77. **कृ**, 78. **गृ**, 79. **क्षिप्**, 80. **मृ**, 81. **तुद्**, 82. **मुच्**।
- **रुधादिगणे–** 83. **छिद्**, 84. **भिद्**, 85. **हिंस्**, 86. **भञ्ज्**, 87. **रुध्,** 88. **भुज्**, 89. **युज्**।
- **तनादिगणे–** 90, **तन्**, 91. **कृ**।
- **क्र्यादिगणे–** 92. **बन्ध्**, 93. **मन्थ्**, 94. **क्री**, 95. **ग्रह्**, 96. **ज्ञा**।
- **चुरादिगणे–** 97. **चुर्**, 98. **चिन्त्**, 99. **कथ्**, 100. **भक्ष्**।

एतेषां धातूनां दशसु लकारेषु सर्वाणि रूपाणि स्पर्धालुना कण्ठस्थीकरणीयानि।